क्लेशगणः सर्व्वसत्त्वानां संक्लेशं निदर्शयत्यसौ"। २क्लेदकारके जलादौ त्रि०।

**क्लेदु** पु० क्लिद-उन्। १चन्द्रे उज्ज्वल० २सन्निपाते त्रिका०

**क्लेश** पु० क्लिश-भावे घञ्। अपतापे दुःखे क्लिश्नन्ति क्लिश-बाधने कर्त्तरि अच्। पातञ्जलोक्तेषु अविद्यादिषु पञ्चसु। "क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात० सू०। "अविद्यादयः क्लेशाः" भा०। "क्लिश्नन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति" विवरणम्। अविद्यादीनां यथाक्लेशहेतुत्वात् तच्छब्दवाच्यत्वम् तथा तेषां निरोधोपायश्च तत्रैव साधनपादे दर्शितो यथा

"अथ के क्लेशाः कियन्तोवेति" भा०

"अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः" सू०।

"इति पञ्च विपर्य्यया इत्यर्थः। ते स्पन्दमाना गुणाधिकारं द्रढयन्ति परिणाममवस्थापयन्ति कार्य्यकारणस्रोत उन्नमयन्ति परस्परानुग्रहतन्त्रीभूत्वा कर्म्मविपाकं चाभिनिर्हरन्ति" भाष्यम्।

"पृच्छति अथेति। अविद्येति सूत्रेण परिहारः। अविद्यादयः क्लेशाः। व्याचष्टे पञ्च विपर्य्यया इति। अविद्या तावद्विपर्य्यय एव अस्मितादयोऽप्यविद्योपादानास्तदविनिर्भागवर्त्तिन इति विपर्य्ययाः। ततश्चाविद्यासमुच्छेदे तेषामपि समुच्छेदोयुक्त इति भावः। तेषामुच्छेतव्यताहेतुं संसारकारणत्वमाह ते स्पन्दमानाः। समुदाचरन्तो गुणानामधिकारं द्रढयन्ति बलवन्तं कुर्व्वन्ति अतएव परिणाममवस्थापयन्ति अव्यक्तमहदहङ्कारपरम्परया हि कार्य्यकारणस्रोत उन्नमयन्ति उद्भावयन्ति। यदर्थं सर्व्वमेतत् कुर्व्वन्ति तद्दर्शयति परस्परेति। कर्म्मणां विपाको जात्यायुर्भोगलक्षणः पुरुषार्थः" तमभी क्लेशा अभिनिर्हरन्ति निष्पादयन्ति। किं प्रत्येकं? नेत्याह परस्परानुग्रहेति कर्म्मभिः क्लेशाः क्लेशैश्च कर्म्माणीति" वाचस्पतिविवरणम्।

"अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्" सू०

"अत्राऽविद्या क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विधकल्पितानां प्रसुप्ततनुविच्छिन्नोदाराणाम्। तत्र का प्रसुप्तिः? चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः तस्य प्रबोध आलम्बने सम्मुखीभावः प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेऽप्यालम्बनेनाऽसौ पुनरस्ति दग्धबीजस्य कुतः प्ररोह इति। अतः क्षीणक्लेशः कुशलश्चरमदेह इत्युच्यते तत्रैव सा दग्धबीजभावा पञ्चमी क्लेशावस्था नान्यत्रेति सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य संमुखीभावेऽपि सति न भवत्येषां प्रबोध इत्युक्ता प्रसुप्तिर्दग्धबीजानाम् अप्ररोहश्च। तनुत्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवो भवन्ति। तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः समुदाचरन्तीति विच्छिन्नाः कथं? रागकाले क्रोधस्यादर्शनात्। न हि रागकाले क्रोधः समुदाचरति रागश्च क्वचित् दृश्यमानो विषयान्तरे नास्ति, नैकस्यां स्त्रियां चैत्रोरक्त इति अन्यासु स्त्रीषु विरक्तः, किन्तु तत्र रागोलब्धवृत्तिः, अन्यत्र भविष्यद्वृत्तिरिति स हि तदा प्रसुप्ततनुविच्छिन्नोभवति। विषये यो लब्धवृत्तिः स उदारः। सर्व्व एवैते क्लेशविषयत्वं नातिक्रामन्ति। कस्तर्हि विच्छिन्नः प्रसुप्तस्तनुरुदारोवा क्लेशः? इति, उच्यते सत्यमेवैतत् किन्तु विशिष्टानामेवैतेषां विच्छिन्नादित्वं यथैव प्रतिपक्षभावनातो निवृत्तं तथैव स्वव्यञ्जकाञ्जनेनाभिव्यक्तम् इति सर्व्व एवामी क्लेशा अविद्याभेदाः कस्मात्? सर्व्वेषु अविद्यैवाभिप्लवते यदविद्यया वस्त्वाकार्य्यते तदेवानुशेरते क्लेशाः विपर्य्यासप्रत्ययकाले उपलभ्यन्ते क्षीयमाणां चाविद्यामनुक्षीयन्त इति" भा०।

"हेयानां क्लेशानामविद्यामूलत्वं दर्शयति अविद्याक्षेत्रमित्यादि। तत्र का प्रसुप्तिरिति स्वोचितामर्थक्रियामकुर्व्वतां क्लेशानां सद्भावे न प्रमाणमस्तीत्यभिप्रायः पृच्छतः। उत्तरं चेतसीति। सा नामार्थक्रियां कार्षुः क्लेशाः विदेहप्रकृतिलयानां बीजभावं प्राप्तास्तु ते शक्तिमात्रेण सन्ति चोर इव दण्डिनोऽविवेकख्यातेरस्त्यदस्ति कारणं तद्भस्मतायाम् अतोविदेहप्रकृतिलया विवेकख्यातिविरहिणः प्रसुप्तक्लेशा न यावदवधिकालं प्राप्नुवन्ति, ततः प्राप्तौ तु पुनरावृत्ताः सन्तः क्लेशास्तेषु तेषु विषयेषु संमुखीभवन्ति। शक्तिमात्रेण प्रतिष्ठा येषां ते तथोक्ताः। तदनेनोत्पत्तिशक्तिरुक्ता बीजभावोपगम इति च कार्य्यशक्तिरिति। ननु विवेकख्यातिमतोऽपि क्लेशाः कस्मान्न प्रसुप्ताः? इत्यत आह प्रसंख्यानवत इति। चरमदेहो न तस्य देहान्तरमुत्पत्स्यते यदपेक्षयाऽस्य देहः पूर्व्व इत्यर्थः। विदेहादिष्वित्यर्थः नान्यत्र ननु सतो नात्यन्तविनाश इति किमिति तदीययोग्यर्द्धिबलेन विषयसंमुखीभावेन क्लेशाः प्रबुध्यन्ते इत्यत आह सतामिति। सन्तु क्लेशाः दग्धस्तेषां प्रसंख्यानाग्निना बीजभाव इत्यर्थः। क्लेशप्रतिपक्षः क्रियायोगस्तस्य